No. ४८०१

स्कन्द पुराणे

Title गणेश व्रत कथा

Author ×

Extent ८ Age ×

Subject पुराण माहात्म्यं

गणेशचतुर्थीव्रतकथा स्कन्दपुराणे

५७५१

ॐ स्वस्ति श्रीगणेशाय नमः

ओं श्रीगणेशाय नमः ॥ नंदिकेश्वर उवाच ॥ शृणुष्वैकाग्रचित्तः सन् गणेश्वरव्र
तं शुभम् ॥ चतुर्थ्यां तु कृष्णपक्षे तु सदा कार्यं प्रयत्नतः ॥ १ ॥ सनत्कुमार योगी
न्द्र यदीच्छेच्छुभमात्मनः ॥ नारी वा पुरुषो वापि यः कुर्याद्व्रतमुत्तमम् ॥ २ ॥ मोच
यत्याशु विप्रेन्द्र संकष्टाद्व्रतनंतरम् ॥ अपवादहरं चैव सर्वविघ्नप्रणाशनम् ॥
॥ ३ ॥ कांतारे विषमे वापि गृहे राजकुले तथा ॥ सर्वसिद्धिकरं चैतद्व्रतानामु
त्तमोत्तमम् ॥ ४ ॥ गजाननप्रियं चापि त्रिषु लोकेषु विश्रुतं ॥ अनेन विद्यते व्र
तं सर्वसंकष्टनाशनम् ॥ ५ ॥ सनत्कुमार उवाच ॥ केन चादौ पुरा चीर्णं
मर्त्यलोके कथं गतम् ॥ एतत्समस्तं विस्तार्य ब्रूहि गाणेश्वरं व्रतम् ॥ ६ ॥
नंदिकेश्वर उवाच ॥ चक्रे व्रतं जगन्नाथो वासुदेवः प्रतापवान् ॥ आदिष्टं ना
रदेनैव वध्यालांछनशांतये ॥ ७ ॥ सनत्कुमार उवाच षड्गुणैश्वर्यसंपन्नः सृ
ष्टिसंहारकारकः ॥ वासुदेवो जगद्व्यापी प्राप्तवांल्लांछनं कथं ॥ ८ ॥ एतदाश्चर्य
माख्यानं ब्रूहि त्वं नंदिकेश्वर ॥ नंदिकेश्वर उवाच ॥ भुवो भारावतारार्थं च

सुदेवसुतावुभौ ॥९॥ रामकृष्णौ समुत्पन्नौ पद्मनाभहलायुधौ ॥ जरासंधभ
यात्कृष्णो द्वारकां समकल्पयत् ॥१०॥ विश्वकर्माणमाहूय पुरीं हाटकनि
र्मितां ॥ तत्र षोडशसाहस्रं स्त्रीणां चैव वराधिकम् ॥११॥ भवनानि मनोज्ञानि
तेषां मध्ये व्यकल्पयत् ॥ पारिजाततरुं चैव तासां भोगाय कल्पयन् ॥१२॥ या
दवानां गृहास्तत्र षट्पंचाशत कोटयः ॥ अन्येपि बहवो लोका वसंति विगत
ज्वराः ॥१३॥ यत्किंचित्त्रिषु लोकेषु सुंदरं तच्च दृश्यते ॥ सत्राजित प्रसेनाख्यौ पु
त्रावुग्रस्य विश्रुतौ ॥१४॥ स्वंभोधितीरमासाद्य तन्मनस्कतया च सः ॥ सत्राजि
त्तपस्तेपे सूर्यमुद्दिश्य बुद्धिमान् ॥१५॥ व्रतं निरसनं मत्वा सूर्यसंवद्धलोचनः ॥
ततः प्रसन्नो भगवान्सत्राजितपुरः स्थितः ॥१६॥ सत्राजितोपि तुष्टाव दृष्ट्वा देवं दि
वाकरम् ॥ तेजोराशे नमस्तेस्तु नमस्ते सर्वतोमुखः ॥१७॥ विश्वव्यापिन्नमस्तेस्तु
नमस्ते विश्वरूपिणे ॥ कश्यपेयनमस्तेस्तु हरिदश्व नमोस्तु ते ॥१८॥ ग्रहराज नम
स्तेस्तु नमस्ते चंडरोचिषे ॥ वेदत्रयनमस्तेस्तु सर्वदेव नमोस्तु ते ॥१९॥ प्रसीद
पाहि देवेश प्रसुदृष्ट्या मां दिवाकर ॥ इत्थं संस्तूयमानो सौ देवदेवो दिवाकरः ॥२०॥
स्निग्धगंभीरमधुरं सत्राजितमुवाच ह ॥ वरं ब्रूहि प्रसन्नोस्मि यन्मे मनसि व

॥श्री॰॥
ग॰ च॰
॥॰२॥

तेने ॥२१॥ सत्राजितमहाभागानुष्टोहं तव निष्क्रयान् ॥ सत्राजित उवाच ॥ स्यमं
तकमणिं देहि परितुष्टोसि चे द्रवे ॥२२॥ ददौ तस्य च तद्रत्नं स्वकंठादवनार्थि
सः ॥ सूर्य उवाच ॥ आराष्ट्रकं राज्ञां न कुंभं स्त्रवते सौ महामणिः ॥२३॥ शुचिष्म
ता सदा धार्य्यं रत्नमेतन्महोत्तमम् ॥ सत्राजिन्क्षणेनैतद शुचिं हंति मानवं
॥२४॥ इत्युक्तं न ददर्शे देवो तेजोराशिर्दिवाकरः ॥ तत्कंठ रत्नज्वलमान रूपी पु
रीसमागम्यस्य विवेश स तव रम्यां ॥२५॥ दृष्ट्वा तुलोकामनसा दिवाकरं संचिंतयं
तस्मिन्मितावदत्सूर्य्यः ॥ समागतो यं हरिदश्वदीप्तिर्जनार्दनं द्रष्टुमसंशये
न ॥२६॥ नायं सहस्रांशुरिती ह लोकाः सत्राजितो यं मणिकंठभास्वान् ॥ स्य
मंतकं महारत्नं दृष्ट्वा तत्कण्ठमण्डलो ॥ स्पृहां चक्रे जगन्नाथो न जहार मणिं त
तः ॥२७॥ सत्राजितो जातभयो याचयिष्यति मां हरिः ॥ प्रसेनाय ददौ भ्रात्रे धा
र्य्यायं शुचिनात्वया ॥२८॥ एकदा कंठ देशो सौ क्षिप्त्वा तं मणिमुत्तमम् ॥ मृग
याक्रीडनार्थाय ययौ क्रमेन संयुतः ॥२९॥ अश्वारूढो शुचिश्चासौ हतः सिं
हेन तत्क्षणात् ॥ रत्नमादाय सिंहोपि गच्छन्नाम्बवता हतः ॥३०॥ नीत्वा स
व बिले रत्नं ददौ पुत्राय जाम्बवान् ॥ अंतरीवि वि सङ्क्रमोपि स्वकैः सर्वैः समावृतः ॥३१॥

रामः
२

प्रसेनाख्यापि नायाति हतः कृष्णेन निश्चितं ॥ मणिलोभेन हा कष्टं बांधवः पापि
ना हतः ॥ ३२ ॥ द्वारकावासिनः सर्वे जना ऊचुः परस्परं ॥ वृथापवादसंतप्तः कृष्णो
ऽपि नगराज्जनैः ॥ ३३ ॥ सहैव वने ययावारण्यं दृष्ट्वा सिंहेन पातितः ॥ प्रसेनं वाहन
युतं तत्पादानुसरंस्ततः ॥ ३४ ॥ ऋक्षेण निहतं दृष्ट्वा कृष्णस्तत्पदलग्नतः ॥ विवे
शायो जनस्थानं गंधकारं स्वतेजसा ॥ ३५ ॥ निवारयन्ददर्शाग्रे प्रासादं बहुभूमिकम् ॥
तत्र जांबवतो बालं दोलायामभिनघुतिं ॥ ३६ ॥ माणिक्यं लंबमानं च ददर्शाभग
वान्हरिः ॥ रूपयौवनसंपन्ना कन्या जांबवती पुनः ॥ ३७ ॥ दोलां दोलयमानं च
ददर्श कमलेक्षणः ॥ विस्मयं च महच्चक्रे दृष्ट्वा तां चारुहासिनीम् ॥ ३८ ॥ सिं
हः प्रसेनमवधीत्सिंहो जांबवता हतः ॥ सुकुमारक मा रोदीस्तव ह्येष स्यमं
तकः ॥ ३९ ॥ मदनज्वरदाहार्तो दृष्ट्वा तं कमलेक्षणाम् ॥ उवाच ललितं वाक्यं
गम्यतां गम्यतामिति ॥ ४० ॥ रत्नं गृहीत्वा वेगेन यावद्गच्छेत्तु जांबवान् ॥ इत्याक
र्ण्य हसन् शौरिः शंखं दध्मौ प्रतापवान् ॥ ४१ ॥ तदाकर्ण्य सहसोत्थाय जांबवान्युद्
धे ततः ॥ तयोर्युद्धमभूद्घोरं हरिजांबवतोस्तदा ॥ ४२ ॥ द्वारकावासिनः सर्वे गत्वा
स्ते सप्तमे दिने ॥ मृतः कृष्णो भक्षितो वा संदिग्धं विचार्य च ॥ ४३ ॥ परलोक

॥ श्री० ॥
ग० च०
कृ० क०
॥ ०२ ॥

3

क्रियां चक्रुः परेतस्य तु तेन तदा ॥ अष्टाविंशद्दिनं यावद्बाहुप्रहरणो विभुः ॥ ४४ ॥ युयुधे
तेन ऋक्षेण युद्धकर्माणि नोच्छितः ॥ जांबवांश्चात्मनःसत्त्वाद्दृष्ट्वा देवबलं महत्
॥ ४५ ॥ जांबवानुवाच ॥ अजेयोऽहं सुरैः सर्वैर्यक्षराक्षसमानवैः ॥ त्वया जितोऽहं देवे
शादेव त्वमसि निश्चितम् ॥ ४६ ॥ ज्ञातेनात्र वैष्णवं तेजो नान्यथा बलमीदृशम् ॥ इ
ति प्रसाद्य देवेशं ददौ माणिक्यमुत्तमम् ॥ ४७ ॥ सुतां जांबवतीं नाम भार्यार्थे वरवर्णि
नीम् ॥ पाणिं च ग्राहयामास देवदेवं स जांबवान् ॥ ४८ ॥ मणिमादाय देवोऽपि जांब
वत्यापि संयुतः ॥ तद्वृत्तान्तं समाचष्ट द्वारकावासिनां ततः ॥ ४९ ॥ सत्राजितस्य मा
णिक्यं दत्तवान्संसदि स्थितः ॥ मिथ्याभिशापसंमुक्तिं प्राप्तवान्मधुसूदनः ॥
॥ ५० ॥ सत्राजितोऽपि संत्रस्तः श्रीकृष्णाय ददौ सुताम् ॥ सत्यभामां महाबुद्धिः रूपौ
दार्यगुणान्वितां ॥ ५१ ॥ शतधन्वाक्रूरमुख्या यादवा दुष्टमानसाः ॥ सत्रा
जितेन तेन वैरं चक्रू रत्नाभिलाषिणः ॥ ५२ ॥ दुरात्मा स शतधन्वापि गते कृष्णेऽपि कु
त्रचित् ॥ सत्राजितं निहत्याशु मणिं जग्राह पापधीः ॥ ५३ ॥ कृष्णस्य पुरतः स
त्यागत्वा चेष्टं विचेष्टितं ॥ अंतरिक्षे वहिः कोपी कृष्णकपटनायकः ॥ ५४ ॥
बलदेवपुरो वाक्यमुवाच धरणीधरः ॥ शतधन्वा सत्राजितं हत्वा मणिमादाय

राम: २

गच्छति ॥ ५५ ॥ निहत्य स्यन्तधन्वायं मणिमादाय गच्छति ॥ मम भोग्यं च तद्रत्नं भवि
ष्यति न संशयः ॥ ५६ ॥ एतच्छ्रुत्वा भयत्रस्तः स्यन्तधन्वा यादवः ॥ अक्रूरयाक्रूरनामाने
मणिं कप्रददौ च सः ॥ ५७ ॥ अश्वारूह्य वडवां वेगान्निर्गतो दक्षिणां दिशाम् ॥
रथस्थावन्वगच्छेतां तदा रामजनार्दनौ ॥ ५८ ॥ शतयोजनमात्रेण ममार
वडवा तदा ॥ पलायमानो निहतः पदातिस्तु पदातिना ॥ ५९ ॥ रथस्थे बलदेवे
तु हरिणा रत्नलोभिना ॥ न दृष्टं तत्र तद्रत्नं बलदेवपुरो वदत् ॥ ६० ॥ तदाकर्ण्य
महारोषादुवाच वचनं बली ॥ कपटी त्वं सदा कृष्ण लोभी पापी सुनिश्चितं ॥ ६१ ॥
अर्थाय स्वजनं हंसि कस्त्वां बंधुः समाश्रयेत् ॥ अनेकशपथैः कृष्णो बलदे
वप्रसादयन् ॥ ६२ ॥ सोपि धिक्कृष्णमित्युक्त्वा ययौ वेदर्भमंडलं ॥ कृष्णोपि रथ
मारूह्य प्रययौ द्वारकां प्रभुः ॥ ६३ ॥ न तथैवोचुर्जनाः सर्वे न साधीयान यं हरिः ॥
॥ निष्कासितो रत्नलोभाज्ज्येष्ठो भ्राता बलो बली ॥ ६४ ॥ तच्छ्रुत्वा दीनवदनः पापीव
प्रबभौ च सः ॥ वृथाभिशापसंतप्तो बभूवु जगत्पतिः ॥ ६५ ॥ अक्रूरोपि विनिः
क्रम्य तीर्थयात्रामिषात्ततः ॥ काश्यां गत्वा सुखेनैष यज्ञं यज्ञपतिं विभुं ॥ ६६ ॥ तो
षयामास तं देवं तेन द्रव्येण बुद्धिमान् ॥ सुरालयगृहैश्चित्रैर्नगरं समकल्पयत् ॥ ६७ ॥

॥श्री०॥
ग० च०
व्र० क०
॥४॥

नदुर्भिक्षंनैवैरोगाईतयोनचदुष्कृतं॥ शुचिनाधार्यतेनेनमणिःसूर्यस्यनिर्मि
तं॥ इदं ज्ञानन्नापिहिसर्वज्ञोमानुषंभावमाश्रितः॥ लोकाचारमतोमायामज्ञा
नंचसमाश्रितः॥ इत्थंवंधुवैरंसमुत्पन्नंलांछनंसमुपस्थितं॥ तथापवादवह
र्णंजायमानेकथंसहेत्॥७०॥ इतिचिंतातुरंकृष्णंनारदःसमुपस्थितः॥
गृहीत्वाननंतांपद्मजांसुखोसीनस्ततोब्रवीत्॥७१॥ नारदउवाच॥ किमर्थंवि
द्यतेदेवकिंवातेशोककारणं॥ यथावृत्तंसमाचष्टनारदायसकेशवः॥७२॥
श्रुत्वनारदउवाच॥ जानामिकारणंदेवयदर्थंलांछनंतव॥ त्वयाभाद्रपदेशु
क्लचतुर्थ्यांचंद्रदर्शनम्॥७३॥ कृतंतेनसमुत्पन्नंलांछनंतनुवद्येवने॥ श्री
दे कृष्णउवाच॥ वदनारदमेशीघ्रंकौतुकंचंद्रदर्शने॥ किमर्थंतुद्वितीयायांनर
स्यकुर्वंतिदर्शनं॥७४॥ नारदउवाच॥ गणनाथेनसंतप्तश्चन्द्रमारूपदर्पितः॥
त्वद्दर्शनेनराणांहिदुर्यानिंदाभविष्यति॥७५॥ श्रीकृष्णउवाच॥ किमर्थं
गणनाथेनसंतप्तश्चन्द्रःसुधामयः॥ इदमाख्यानकंश्रेष्ठंयथातद्वक्तुम
र्हसि॥७६॥ नारदउवाच॥ गणानामाधिपत्येनरुद्रेणब्रह्मणापुरा॥ संस्था
पितोभिषिंच्यायंप्रीतिपूर्वंगणेश्वरः॥७७॥ अणिमामहिमाचैवगरिमा
लघिमातथा॥ प्राकाम्येशीवशित्वंचायोथकामोवसायिता॥७८॥

॥रामः॥
४

भार्यार्थं प्रददौ देवो गणेशाय प्रजापतिः ॥ पूजयित्वा गणाध्यक्षं स्तुतिं कर्तुं
प्रचक्रमे ॥ ७९ ॥ श्रीब्रह्मोवाच ॥ गजवक्त्रं गणाध्यक्षं लंबोदरं वरप्रदं ॥ विघ्ना-
धीश्वरदेवेश सर्वसृष्टिसंहारकारक ॥ ८० ॥ पूजयेयुर्गणाध्यक्षं मोदकाद्यैश्च ये
जनाः ॥ तेषां प्रजायते सिद्धिर्निर्विघ्नेन न संशय ॥ ८१ ॥ असंपूज्य गणा-
ध्यक्षं ये वांछंति मनोरथान् ॥ न तेषां जायते सिद्धिः कल्पकोटिशतैरपि ॥ ८२ ॥
त्वद्भक्त्या तु गणाध्यक्ष विष्णुः पालयते सदा ॥ रुद्रोपि संहरत्याशु त्वत्कृतेनैव क-
रोम्यहं ॥ ८३ ॥ इत्थं संस्तूयमानोसौ देवदेवो गजाननः ॥ उवाच परमप्रीतो
ब्रह्माणं जगतां पतिः ॥ ८४ ॥ श्रीगणेश्वर उवाच ॥ प्रीतोस्मि ते नया स्तुत्या पूज-
यामोदकादिभिः ॥ वरं ब्रूहि प्रदास्यामि यत्ते मनसि वर्त्तते ॥ ८५ ॥ श्रीब्रह्मोवाच ॥
क्रियमाणस्य मे सृष्टिं निर्विघ्नं जायते प्रभो ॥ एवमस्त्विति देवोसौ गृहीत्वा मो-
दकान्करे ॥ ८६ ॥ सत्यलोकात्समागच्छन्स्वेच्छया गगने शनैः ॥ चंद्रलोकं समा-
यातः स्वविस्मितो गणनायकः ॥ ८७ ॥ अथ हासं महच्चक्रे सोमो रूपमदान्वि-
तः ॥ तं दृष्ट्वा कोपताम्राक्षो गणाध्यक्षः शशाप ह ॥ दर्शनीयः सुरूपोहं सुं-
दरश्चाहमित्यथ ॥ गर्वितोसि शशांक त्वं दर्पस्य फलमाप्स्यसि ॥ ८८ ॥ ९

॥श्री.॥
ग. च.
ब्र. क.
॥५॥

अद्यप्रभृतिलोकास्त्वांनहिपश्यंतिपापिनं॥ येपश्यंतिप्रमादेनत्वांनराभग्नलांछ
नं॥२०॥ मिथ्याभिशापसंयुक्ताभविष्यंतिहितेध्रुवं॥ हाहाकारोमहाञ्जातः
श्रुत्वाशापंसुभीषणम्॥२१॥ अत्यंतम्लानवदनश्चन्द्रोजलमध्यविशत्॥
कुमुदंकुमुदांनाथस्थितस्तत्रकृतालयः॥२२॥ ततोदेवर्षिगंधर्वानिरासादीनमा
नसाः॥ तुरासाहंपुरोधायजग्मुःसर्वेपितामहम्॥२३॥ दृष्ट्वापितामहंदेवंत्रासं
सुस्वस्तुचेष्टितम्॥ दत्तःशापोगणेशेनकथयामासुरादरात्॥२४॥ विचार्यभगवा
न्ब्रह्मातान्सुरानिदमब्रवीत्॥ गणेशशापेदेवेंद्राःशक्यतेकेनवान्यथा॥२५॥
कर्तुमिन्द्रेणनमयाविष्णुनावापिनिश्चितम्॥ तमेवदेवदेवेशंव्रजध्वंशरणंसु
राः॥२६॥ सएवशापमोक्षंचकरिष्यतिनसंशयः॥ देवाऊचु॥ केनोपायेनवरदोग
जवक्त्रोगणेश्वरः॥२७॥ पितामहमहाप्राज्ञतदस्माकंवदप्रभो॥ पितामहउवा
च॥ चतुर्थ्यांदेवदेवोसौपूजनीयःप्रयत्नतः॥२८॥ कृष्णपक्षेविशेषेणनक्तंकु
र्याद्व्रतन्नृपं॥ अपूपैर्घृतसंयुक्तैर्मोदकैःपरितोषयेत्॥२९॥ मधुमन्त्रंहवि
ष्यंचस्वयंभुंजीतकामतः॥ स्वर्णरूपंगणेशस्यदातव्यंद्विजसत्तमे॥ ३०॥
शक्त्याचदक्षिणांदद्याद्वित्तशाठ्यविवर्जितः॥ एवंतेप्रेषयामासुःसमेत्यच

॥राम:॥
५

बृहस्पतिः॥१०१॥ भगवान्कथयामासवचोब्रह्मोदितंयथा॥ व्रतंचक्रेततश्चंद्रो
यथोक्तंब्रह्मणापुरा॥१०२॥ आविर्बभूवाथगणेश्वरोव्रतेनशीतांशुकृतेन
तुष्टः॥ तंक्रीडमानंगणनायकंचतुष्टाववह्वानुकलानिधान॥१०३॥ त्वंकार
णंकारणकारणानांवेत्तासिविश्वंचविभोप्रसीद॥ प्रसीददेवेशजगन्निवा
सगणेशलंबोदरवक्रतुण्ड॥१०४॥ तेदेवनष्टानिभवंतिहिलोकेज्ञातामयाहिसक
लःप्रभावः॥ येचाप्युदासीनतराश्चपापास्तेयांतिपापंनरकेसदेव॥१०५॥ एवं
संस्तूयमानोसौचंद्रेणाथगजाननः॥ उवाचवचनंभव्यंशशांकंहर्षय
न्मुदा॥१०६॥ गणेशउवाच॥ तुष्टोहंतवदास्यामिवरंब्रूहिनिशाकरः॥ स्तुत्या
नयाव्रतेनापितपसानियमेनच॥१०७॥ चंद्रउवाच॥ लोकानांदर्शनीयोहं
भवामिपुनरेवहि॥ विपापोहंविशापोहंत्वत्प्रसादाद्गणेश्वरः॥१०८॥ गणे
शउवाच॥ वरमन्यत्प्रदास्यामिनैनंदेयंमयातव॥ ब्रह्मानदुपधार्याहंस
हदेवैर्गणेश्वरम्॥१०९॥ विशापंकुरुदेवेशप्रार्थयामोवयंतवः॥ विशापु
मकरोत्चंद्रंकमलासनगौरवात्॥११०॥ शुक्लापक्षेचतुर्थ्यांतुयेपश्यंतिसदै
वहि॥ मिथ्यापवादमामासंतेप्राप्स्यंतिनसंशयः॥१११॥ मासादौसर्वमे

॥श्री॰ ग॰च॰ व्र॰क॰ ॥॰६॥

6

वत्तायं पश्यंति सदा जनाः॥ भाद्रायां शुक्लपक्षस्य तेषां दोषो न जायते॥११२॥ त
दा प्रभृति लोकोयं द्वितीयां कृतनादरः॥ चंद्रस्य दर्शनार्थाय गणनाथस्य
भाषितं॥ ११३॥ भाद्रे शुक्ले चतुर्थ्यां तु यस्तां पश्यति मंदधीः॥ मिथ्यापवाद
मभितस्त्वावर्षं तस्य जायते॥ ११४॥ पुनरेव तु पप्रच्छ कलावान्गणनायकम्॥
केनोपाएन देवेशानुष्ठेयं भसितछदः॥ ११५॥ श्रीगणेशोवाच॥ सदा कृष्णच
तुर्थ्यां तु मोदकाद्यैः प्रपूज्य मां॥ रोहिणीसहितं त्वां च सम्यगर्घ्यविधानतः॥
११६॥ यथाशक्ति च मद्रूपं स्वर्णेन परिकल्पितं॥ दत्वा द्विजाय शुक्लाय
कथां श्रुत्वा विधानतः॥ ११७॥ सदा तस्य करिष्यामि शं कष्टस्य निवारणं॥
भाद्रशुक्लचतुर्थ्यां तु मृण्मयं प्रतिमां शुभां॥ ११८॥ हेमाभावे तु कर्तव्या
नानापुष्पैः प्रपूज्य मां॥ ब्राह्मणान्भोजयेत्पश्चाज्जागरं च विशेषतः॥
११९॥ स्थापयेद्व्रणं कुंभं धान्यस्योपरि सोभितं॥ यथाशक्त्या तु मद्रू
पं स्थानकुंभेन निर्मितं॥ १२०॥ वस्त्रद्वयसमाछन्नं मोदकाद्यैः प्रपूज्य
मां॥ स्नात्वा वरधरो मर्त्यो ब्रह्मचर्यरतः शुचिः॥ १२१॥ रोहिणीसहितं

॥राम ॰६

धू. जा.

स्नं चयज्ञां प्राप्य चमन्तुरः। रजतस्य चरूपं ते यथा सञ्ज्ञा विनिर्मितम्॥ १२२ गं
धं कुं वोदरायेति। पुष्पं सिद्धिप्रदायच। वस्त्रं शिवप्रियायेति। गणाधिपतये नमः॥
१२३॥ धूपं गजमुखायेति। दीपं मूषकवाहन। विघ्ननाशाय नैवेद्यं। फलं स
र्वार्थसिद्धिदे। १२४। तांबूलं काम्यरूपाय। दक्षिणां धनदायच। इक्षुदंडे सदा
राज्यनाम्ना शोभाकरं शुभम्॥ १२५॥ विसर्जने समारंभे सर्वसिद्धिप्रदा
यकम्। एवं संपूज्य विघ्नेशं केयां स्तुत्वा विधानतः। १२६। मंत्रेणानेन
नत्वा च ब्राह्मणाय निवेदयेत्। दानेनानेन देवेश प्रीतो भव गणेश्वरः॥
॥१२७॥ सर्वत्र सर्वदा देव निर्विघ्नं कुरु सर्वदा। मानोन्नतिं च राज्यं च पुत्र
पौत्र प्रदेहि मे॥ १२८। गावो धान्यं च वासांसि सिद्ध्यान्सर्वस्वसक्तितः। द
त्वानु ब्राह्मणेः सर्वस्वयं भुंजीत कामतः॥ १२९। मोदकापूपमधुरं लवण
क्षारवर्जितं। एवं करोति यश्चैव तस्याहं सर्वदा जयं॥ १३०। सिद्धिं च ध
न धान्यं च ददामि विपुलां प्रजां। इत्युक्त्वा तर्दधे देवो गणानां यो विनायकः॥
॥१३१॥ नद्भुतं कुरु कृष्ण त्वं ततः शुद्धिमवाप्स्यसि। नारदेनैव मुक्तस्य व्रतं च

॥ श्री ॥
ग॰ च॰
व्र॰ क॰
॥ ७ ॥

केहरिः स्वयम् ॥ १३२ ॥ गणेशस्तस्य संतुष्टो वरं प्रच्छन् यथेप्सितं ॥ मिथ्याप
वादसंसृष्टिर्द्वितीयं कृष्णयाचितं ॥ १३३ ॥ येस्त्वेवं तितवाख्यानं स्यमंतकम
णीयकं ॥ चंद्रस्य चरितं सर्वं तेषां दोषो न जायते ॥ १३४ ॥ भाद्रशुक्लचतुर्थ्यां तु
कदाचिच्चंद्रस्य दर्शनं ॥ जानं तत्परिहारार्थं श्रोतव्यं सर्वमेव तु ॥ १३५ ॥ यदा यदा
मनः कष्टसंदेह उपजायते ॥ तदा तदा हि श्रोतव्यमाख्यानं कष्टनाशनं ॥ १३६ ॥
एवमुक्त्वा गतो देवो गणेशः कृष्णतोषितः ॥ वरान् गृहीत्वा श्रीकृष्णो भक्त्या सः संक
ष्टमानसः ॥ १३७ ॥ यदा यदा पशुपतिकार्यमुपस्थितं नारी नरश्चाय करोति सद्व्रतं ॥
सिद्ध्यंति कार्याणि यथेप्सितानि किं दुर्लभं विघ्नहरे प्रसन्ने ॥ १३८ ॥ श्राव
णस्याप्यसिते पक्षे चतुर्थीमेकभुग्व्रती ॥ व्रतं कुर्याद्गणेशस्य यावन्मा
सचतुष्टयम् ॥ १३९ ॥ भाद्रे[illegible]चतुर्थ्यां तु शिवलोके प्रपूजिता ॥ तस्यां
स्नानं तथा दानं उपवासोर्चनं जपः ॥ १४० ॥ क्रियमाणं शतगुणं प्रसा
दाद्दंतिनो भवेत् ॥ भाद्रशुक्लचतुर्थ्यां तु यदि चंद्रस्य दर्शनम् ॥ १४१ ॥ द
याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं तदा ॥ कदाचित्कस्यचिद्दोषाच्चतुर्थी

राम:
७

श्री॰ ग॰ च॰ प्र॰ मा॰ ॥ ८ ॥

चंद्रदर्शनम् ॥ पठेन्नद्येषशंग्सद्यैमंत्रंज्ञाववतीकृतम् ॥ १८२ ॥ इतिश्रीस्कंद
पुराणेस्यमंतकोपाख्यानम् ॥ गणेशचतुर्थीव्रतकथासमाप्तं ॥ सं १८८६
शाके १७५१ कर्के ५ र्कदिनगत २८ चैत्रशु॰ ११ दंदितश्रीराम् गंगो ३ ॥ श्रीलि
खिनमिदंपुस्तकं त्रिगुणायुतनारायणप्रशादःसमर्पेन ॥ शुभम् ॥ ॥
ग्रंथजन्मकृतंपापंमयाजन्मसुसप्तसु तन्मेरोगंचशोकंचमाकरीहंतुसप्त
मी ॥ जननीसर्वभूतानांसप्तमीसप्तसप्तको सप्तव्याहृतिकेदेवीनमस्तेरवि
मं ५ ले ॥ २ ॥ सप्तसप्तीवहःप्रीतःसप्तलोकानदीपना ॥ सप्तम्याचनमस्तुभ्यं
नमोनंताय वेधसे ॥ ॥ अर्कपत्रसमायुक्तोवदरीफलसंयुतः ॥ मयानिवेदि
तोभक्त्याग्रथ्योयंप्रतिगृह्यतां ॥ ३ ॥ मकरस्थेरवौमाघेगोविंदाच्युतमाधव
स्नानेनानेनमेदेवयथोक्तफलदोभव ॥ १ ॥ पत्राणि ॥ ८ ॥

राम॰ ८

पोथीगणेशचोथीदीस्तचीपत्रे.८